एकजातानामित्यनेनैकेन पित्रा एकस्यां मातरि जातानामेव ग्रहीतृत्वं न भिन्नोदराणां भिन्नपितृकाणां वेति गम्यते। भ्रातृणामिति पुंस्त्वनिर्द्देशात् पदद्वयोपादानसामर्थ्याच्च सोदराणां भ्रातृभगिनीनामपि परस्परपुत्रग्रहीतृत्वाभावोऽवगम्यते। तदाह दृद्धगौतमः "ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचिदिति" भागिनेयपदं भ्रातृपुत्रस्याप्युपलक्षणम् तेन भगिन्या भ्रातृपुत्रो न ग्राह्य इत्यर्थः सिद्ध्यति"।

एकपुत्रेण पुत्रदानस्य निषेधेन प्रतिग्रहोऽपि निषिद्धः यथोक्तं तत्रैव।

"एक एव पुत्रो यस्येति एकपुत्रः तेन तत्पुत्रदानं न कार्य्यम् "न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति" वशिष्ठस्मरणात्। अत्र स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनस्य दानपदार्थत्वात् परस्वत्वापादनस्य च परप्रतिग्रहं विनानुपपत्तेस्तमप्याक्षिपति तेन प्रतिग्रहनिषेधोऽपि अनेनैव सिद्ध्यति। अतएव वशिष्ठः "न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति" उक्त्वा तत्र हेतुमाह "स हि सन्तानाय पूर्व्वेषामिति" सन्तानार्थत्वाभिधानेनैकस्य दाने सन्तानविच्छित्तिप्रत्यवायो बोधितः। स च दातृप्रतिग्रहीत्रोरुभयोरपि उभयशेषत्वात्"।

मातापित्रोर्मध्ये पितुर्निरपेक्षतया स्त्रियास्तु भर्त्तनुज्ञापेक्षतया मुख्यगौणाधिकारौ तत्रोक्तौ यथा

"बहुपुत्रेणेति पुंस्त्वश्रवणात् स्त्रियाः पुत्रदानप्रतिषेधः। "न स्त्री पुत्रं दद्यात्" नैरपेक्ष्यश्रवणात् भर्त्तनुज्ञाने तस्या अप्यधिकारः। तथा च वशिष्ठः "अन्यत्रानुज्ञानाद्भर्त्तुः" इति। यत्तु "दद्यान्माता पिता यं वा" इति यच्च "माता पिता वा दद्यातामिति" मातुः पितृसमकक्षतयाभिधानं तदपि भर्त्तनुज्ञानविषयमेव। न चैवं विधवाया आपद्यपि पुत्रदानं न स्यात् भर्त्तनुज्ञानासम्भवात् परिग्रहवदिति वाच्यम्। मानवीयलिङ्गदर्शनेन तथाकल्पनात् नैरपेक्ष्यकल्पश्रवणाच्च स्त्रीनिरपेक्षस्यैकस्यापि भर्त्तुर्दानाधिकारः। "दद्यात् माता पिता यं वा"। "माता पिता वा दद्यातामिति" मातृनिरपेक्षैकपितृनिर्द्देशात्, वीजस्य प्राधान्यात् "अयोनिजा अपि पुत्रा इष्यन्त" इति वौधायनीयहेतुदर्शनाच्च। भारतेऽपि "माता भस्त्रा पितुः पुत्रो येन जातः स एव हि" इति। श्रुतिरपि "आत्मा वै जायते पुत्र" इति। मानवे दद्यातामित्युभयकर्तृकताश्रवणाच्चोभयाधिकारो मुख्यः। अतएव वशिष्ठः "शुक्रशोणितसम्भवः पुत्रो मातापितृनिमित्तकस्तस्य प्रदानविक्रयपरित्यागेषु मातापितरौ प्रभवतः" इति। वौधायनोऽपि "मातापित्रोरेव संसर्गसाम्यात्" इति। अतएव "माता पिता वा दद्यातामिति" मनुना मातुर्भर्त्तनुज्ञानसापेक्षत्वात् जघन्यत्वं स्वनुज्ञाननैरपेक्ष्यात् पितुर्म्मध्यमत्वं जनकतासाम्यात् उभयोर्मुख्यत्वमभिप्रेत्य पूर्वपूर्वास्वरसादुत्तरोत्तरमभिहितम्। न चेदमेकमेव वाक्यं द्विवचनान्तैकक्रियाश्रवणादिति वाच्यम् मध्ये विकल्पासङ्गतेः तस्मात् कल्पत्रयमेव। अतएव योगीश्वरः "दद्यान्माता पिता यं वा" इति प्रत्येकमेकवचनान्तमेव क्रियापदमुदाजहार। तत्रापि निमित्तमाह प्रयत्नत इति। प्रकृष्टो यत्नो यस्मिन् कालेऽसौ प्रयत्न आपत्कालस्तेन चापत्काल एव पुत्रदानं नान्यथेत्यर्थः"।

पञ्चवर्षातीतस्यनग्राह्यता तत्रोक्ता यथा

"कालिकापु० "दत्ताद्या अपि तनया निजगोत्रेण संस्कृताः। आयान्ति पुत्रतां सम्यगन्यवीजसमुद्भवाः। पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते। आचूडान्तं न पुत्रः स पुत्रतां याति चान्यतः। चूडाद्या यदि संस्कारा निजगोत्रेण वै कृताः। दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते। ऊर्द्धन्तु पञ्चमाद्वर्षात् न दत्ताद्याः सुता नृप!। गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमञ्चरेत्। पौनर्भवन्तु तनयं जातमात्रं समानयेत्। कृत्वा पौनर्भवस्तोमं जातमात्रस्य तस्य वै। सर्वांस्तु कुर्य्यात् संस्कारान् जातकर्म्मादिकान् नरः। कृते पौनर्भवस्तोमे ततः पौनर्भवः सुतः इति"। अन्यवीजसमुद्भवा अपि दत्ताद्यास्तनया निजगोत्रेण प्रतिग्रहीत्रा स्वगोत्रेण सम्यक् स्वसूत्रोक्तविधिना जातकर्म्मादिभिः संस्कृताश्चेत् तदैव प्रतिग्रहीतुः पुत्रतां प्राप्नुवन्ति नान्यथेत्यर्थः। तदाह वशिष्ठः "अन्यशाखोद्भवो दत्तः पुत्रस्यैवोपनायितः। स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभागिति" दत्ताद्या इत्यादिपदेन कृत्रिमादीनां ग्रहणम्। औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे। कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयन्दत्तश्च दासश्च षडिमे पुत्रपांशुलाः। अभावे पूर्वपूर्वेषां परान् समभिषेचयेत्। पौनर्भवं स्वयन्दत्तं दासं राज्ये न योजयेदिति" पूर्वोपक्रमात्